M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 417

Title: Tripindi Shraddha
Prayoga

417

त्रिपिंडी श्राद्ध प्रयोग।

Tripindi Shraddha Prayoga : Title

: Author

: Editor

: Year, Vols.

: Publisher

417 : Remarks

अनुलोमविलोमजातीयानां निषादजातीयानां नीचजातीयानां पुंसां स्त्रीणां·५

श्रीगणेशायनमः अथत्रिपिंडीश्राद्धप्रयोगः पिशाचाद्युपद्रवनाशार्थंतीर्थेगत्वामध्याह्ने स्थलप्रक्षालनं गोमयेनकृत्वा· त्रिंपिंडीश्राद्धाधिकारार्थं कृछ्रत्रयमेकंवा कृछ्रंगायत्रीजपद्वाराहोमद्वारावाकार्यं· प्रातःस्नानादिमाध्याह्निकांतं कृत्वादेशकालौसंकीर्त्यअमुकगोत्रस्यामुकशर्मणः ममकुलेविविधपीडाकारिणां संततिवृद्धिप्रतिबंधकारिणां अपत्यादिहिंसकानां अस्मत्कुलप्रभवाणां मातामहकुलप्रभवानां बांधवकुलप्रभवानां बंधुवर्गकुलप्रभवानां ज्ञाताज्ञातगोत्रशर्मणां विप्राणां क्षत्रियाणां वैश्यानां शूद्राणां लप्रेतपिशाचब्रह्मराक्षसादिपापयोनिगतानां द्वेषादिप्रीत्यादियहधनादिसंबंधेनास्मत्कुलपीडाकारिणां नागादीनां पिशाचादीनां दिव्यांतरिक्षभूमिस्थानां सात्विकराजसतामसानां ब्रह्मविष्णुरुद्रमयानां प्रेतानां प्रेतत्वनिवृत्तिपूर्वकोत्तमलोकप्राप्त्यर्थं त्रिपिंडीश्राद्धं करिष्ये· सहस्रशीर्षेतिपुरुषसूक्तन्यासपूर्वकं षोडशोपचारैः श्रीविष्णुं संपूजयेत्· सहस्रशीर्षेत्यावाहनं· पुरुषएवे· आसनं· एतावा· पाद्यं· त्रिपादूर्ध्वमर्घ्यं· तस्माद्वि· आचमनं· यत्पुरुषेणेतिस्नानं·

त्रिपिंडी·
१

तंयज्ञमितिवस्त्रं· तस्माद्यज्ञात्सर्व· यज्ञोपवीतं· तस्माद्य· ऋचःसामा· गंधं· तस्मादश्वा· पुष्पं· यत्पुरुषं· धूपं· ब्रा
ह्मणोस्यदीपं· चंद्रमा· नैवेद्यं· नाभ्याआ· तांबूलं· सप्तास्यासन्· दक्षिणां· यज्ञेनय· पुष्पांजलिं· नमोस्त्वनंता
येतिनमस्कारः· यानिकानिप्रदक्षिणां· अनादिनिधनोदेवःशंखचक्रगदाधरः· अक्षय्यःपुंडरीकाक्षःप्रे
तमोक्षप्रदोभवेतिप्रार्थना· अनयापूजयामहाविष्णुःप्रीयतां· अपसव्यं सप्तव्याधेतिश्लोकत्रयंमधुवा
तेतितृचंपठित्वासव्यंश्राद्धसामग्रींसंप्रोक्ष्यपात्रत्रयेतिलोदकंकुर्यात्· शन्नोदेवीतिप्रथमपात्रेयवोसी
तियवान्· द्वितीयेतृणांतंडुलान्· तृतीयेतिलोसीतितिलान्· गंधद्वारेतिगंधं· श्वेतरक्तपुष्पाणि· स
हस्रशीर्षेति· सकृ १६ नतमंहो सकृ ८ ममाग्नेवर्चो· सकृ १· तरत्समंदी· सकृ ४ हंसःशुचिषत् सकृ १ यत्किं
चेदंवरुण· सकृ १ शुचीवोहव्या· सकृ ६ अपवित्रःपवित्रोवा· समस्तसंपत्· अक्रोधनैःशौचपरैः· अप
सव्यं· त्रिविधानांदिव्यंतरिक्षभूमिस्थानांसात्विकराजसतामसानांअज्ञातनामगोत्राणांप्रेतानांप्रेतत्व
निवृत्त्यर्थंत्रिपिंडीश्राद्धंकर्तुंममाधिकारसंप· कालस्य· आमादीनां० सव्येनश्रोत्राचमनं· अपसव्यं· त्रिवि

५
स

त्रिविधानांदिव्यंतरिक्षभूमिष्ठानांसात्विकराजसतामसानांअज्ञातनामगोत्राणांप्रेतानांप्रेतत्वनिवृत्त्यर्थंत्रि
पिंडीश्राद्धमेकोद्दिष्टविधिनाकरिष्ये· स्थानानिदत्वा· दिविस्थानांसात्विकविष्णुमयानांअज्ञातनामगोत्रा
णांप्रेतानांस्थानेक्षणंदत्वाभ· अंतरिक्षस्थानांराजसानांब्रह्ममयानांअज्ञातनामगो· प्रेतानांस्थानेक्षणंद·
भ· प्र· कर्तव्यः· भूमिष्ठानांतामसानांरुद्रमयानामज्ञातनामगो· प्रेतानांस्थानेक्ष· कर्तव्यः· ततः पाद्यादिसर्वं
अनेनक्रमेणकृत्वा· वर्तुलमंडलानिकृत्वागंधादीनि· अज्ञातनामगोत्राः प्रेताः स्वागतं· दिविस्थाः भूर्भुवःस्वः
पाद्यं· एवंराजसतामसयोः· सव्येनाचम्य· अपसव्यं· दिव्यंतरिक्षभूमिस्थाः प्रेताः समाध्वं· ॐ समास्महे· अ
त्रोपविशंतुभवंतः उपविशामः सव्यंपुण्यतिथौउपक्रांतंत्रिपिंडीश्राद्धंकर्मकरिष्ये· अपसव्यं· अपहता· अज्ञा
तनामगोत्रेभ्यः प्रेतेभ्यः हविषु। सव्यपाकप्रोक्षणं। अपसव्यंआपोदत्वादिविस्थानामज्ञातनामगोत्राणांसात्वि
क· प्रेतानां भूर्भुवःस्वः इदमासनं। एवमंतरिक्षभूमिष्ठानांअज्ञातनामगोत्रसात्विकप्रेतस्वधा· क्रियतां· ओंत
था· एवंराजसतामसयोः· यादिव्याआपः सर्वपात्राणांन्युब्जीकरणंनास्ति· प्राचीनावीतिआपोदत्वागंधा

त्रिपिंडी
२

छादनांतोपचाराद्देयाः॰उपवीतिसात्विकराजसतामसेभ्यःगंधाद्याछादनांताउपचाराःउपतिष्ठंतां·आदौमधु
त्रययुतंपिंडत्रयंकृत्वा·पश्चात्पात्रासादनं।देशकालौस्मृत्वा।त्रिविधानां।संतत्यादिप्रतिबंधनिरस्त्यर्थंत्रिपिंडी
श्राद्धांगभूतंपिंडदानादिकरिष्ये·दक्षिणामुखःसव्यंजान्वाच्यअपसव्यं·अपहतेतिरेखांउल्लिख्यकुशाना
स्तार्य।पितृवंशेमृतायेच·ज्ञाताज्ञाताकुलेमम।।तिलोदकंमयादत्तमक्षय्यमुपतिष्ठतां।इतिपिंडोपरिति
लोदकंदत्वाततोयवपिंडंस्पृष्ट्वामध्रुवातीतितृचंजपेत्·पिंडमादाय·पितृवंशेमृतायै·अक्षय्यमुपतिष्ठ
तां·श्लोकत्रयंपठित्वा।इमंयवमयंपिंडंमधुरत्रयसंयुतं।ददामितस्मैप्रेतायय:पीडांकुरुतेमम।येकेचित्प्रे
तरूपेणवर्ततेपितरोमम।यवपिंडप्रदानेनतृप्तिंगच्छंतुशाश्वतीं।येकेचिद्दिवितिष्ठंतिप्रेताःसात्विकरूपिणः·
सकुपिंडप्रदानेनतृप्तिंगच्छंतुतेक्षयां।योमेप्रजांनाशयतिजीवन्नश्यतिवास्वयं।तस्यप्रेतस्यदत्तोयंपिंडस्त २
स्योपतिष्ठतु।येदिविस्थाःसात्विकाअज्ञातनामगोत्राःप्रेताःविष्णुमयःएषयवमयःपिंडःअक्षय्यमुपति
ष्ठतु।इतियवपिंडंदत्वातत्पश्चिमतःरेखांकुर्यात्·पितृवंशेत्यादिपूर्ववत्।तिलोदकंदत्वाततोव्रीहिमयं

पिंडंस्पृष्ट्वामध्रुवातीतितृचंजप्त्वापिंडमादायपितृवंशेतिश्लोकत्रयंपूर्ववदुक्त्वा।इमंव्रीहिमयंपिंडंमधुरत्रयसं
युतं·तन्मुक्तयेप्रदास्यामिपिंडंयःकुरुतेमम·येकेचिद्वायुरूपेणवर्ततेपितरोमम।तंडुलैःपिंडदानेनव्रजंतुग
तिमुत्तमां।अंतरिक्षेचयेकेचिद्राजसावायुरूपिणः।व्रीहिपिंडप्रदानेनतेतृप्यंतुक्षुधान्विताः·अंतरिक्षस्थाः·
अज्ञातनामगोत्राःप्रेताब्रह्ममयःएषव्रीहिमयःपिंडःअक्षय्यमुपतिष्ठतु।इतिव्रीहिपिंडंदत्वा·तत्पश्चिमतोरेखां
कुर्यात्।कुशास्तरणंपितृवंशेतिपूर्ववत्·पठित्वाइमंतिलमयंपिंडंमधुसर्पिःसमन्वितं।तेभ्योददामियेपिंडंम
कुलेकुर्वंतेसदा।येकेचित्तामसाःप्रेताःभूमौतिष्ठंतिसर्वदा।तिलपिंडप्रदानेनगतिंगच्छंतुतेध्रुवां।तमोरूपाश्च
येकेचिद्वर्ततेपितरोमम।पिण्याकपिंडदानेनतेतृप्यंतुक्षुधार्दिताः।भूमिस्थाःतामसाअज्ञातनामगोत्राःप्रेतारु
द्रमयएषतिलपिंडःअक्षय्यमुपतिष्ठतुइतिपिंडंदत्वा·अत्रपितरोमादयध्वं·अभ्यंजनांजने·दिविस्थाःसात्वि
काअज्ञातनामगोत्राअंजनाभ्यंजनेवासः·कुशाभिरस्थ्यर्थंसव्येनएकोद्दिष्टत्रयपूजनंकर्तं·सर्वोपचारसमर्पणे
उपतिष्ठतामितिपठनीयं·अपसव्यं·नमोवःपितरइत्युपस्थाय·वृहत्पात्रेगंधोदकपुष्पाणिप्रक्षिप्यतस्मिन्पा

त्रिपिंडी
३

तुलिंगफलानिस्थापयित्वाउपवीतीदिविस्थाः प्रेताः एषोर्घउपतिष्ठतां इतियवपिंडेपर्यर्घ्यंदद्यात्. पुनः गृहत्वापात्रेजंबीरफलानि
गंधोदकपुष्पाणिनिक्षिप्य. अंतरिक्षस्थाः प्रेता एषोर्घ उपतिष्ठतामिति तंदुलपिंडोपरिदत्वा पुनः गृहत्वापात्रेखर्जूरफला
नि ३ स्थापयित्वाभूमिस्थाः प्रेताः खर्जूरफलसहितएषोर्घउपतिष्ठतां एवमर्घ्यंदत्वापुरुषसूक्तेनतर्पणंकुर्यात्. सव्यं
ताम्रपात्रेजलमिश्रेदुग्धंचंदनंसर्वौषधीः प्रक्षिप्यपिंडानांसमीपेशालग्रामंसंस्थाप्यशंखेन सगंतेविष्णुंतर्पयामीति
त्रिः ३ तत्रक्रमः सहस्रशीर्षापुरुषः १ पुरुषएवे० २ एतावा० ३ त्रिपादूर्ध्व० ४ तस्माद्विराळ० ५ यत्पुरुषेण ६ तंय
ज्ञं० ७ तस्माद्य० ८ तस्माद्यज्ञात्सर्वहु० ९ तस्मादश्वा १० यत्पुरुषं ११ ब्राह्मणो० १२ चंद्रमाम० १३ नाभ्याआसीद १४
सप्तास्या० १५ यज्ञेनयज्ञ० १६ पौराणमंत्रैः प्रार्थयेत्. अनादिनिधनोदेवः शंखचक्रगदाधरः अक्षय्यः पुंडरीकाक्षः
प्रेतमोक्षप्रदोभव १ अतसीपुष्पसंकाशंपीतवाससमच्युतं। येनमस्यंतिगोविंदंनतेषांविद्यतेभयं २ कृष्णकृष्णकृपा
लो त्वमगतीनांगतिप्रद। संसारार्णवमग्नानांप्रसीदपुरुषोत्तम ३ नारायणसुरश्रेष्ठलक्ष्मीकांतवरप्रद। अनेनतर्पणेन
त्वंप्रेतमोक्षप्रदोभव ४ ततोपसव्यंतस्मिंस्तिलान्प्रक्षिप्यपिंडानांसमीपेतर्पयेत्. यः कश्चित्धनलोभेनमृत्युंप्राप्तोन ३
राधमः. समेप्रेतः सुखंदद्यात्तस्मैदुग्धतिलोदकं. धनलोभमृतायेचसर्पयोनिंव्यवस्थिताः। तेमेप्रेताः सुखंदद्युः
तेभ्योदुग्धतिलोदकं। येकेचित्प्रेतरूपेणवर्ततेपितरोमम। तेमेप्रेताः० येकेचित्प्रेतरूपेणत्यक्तानाः परिपीडिताः। तेमे०

येप्रेतायेमहाप्रेतागेभपुर्यांचसंस्थिताः॥ तेमेप्रेता० येचवोनुगताः प्रेताम्हत्स्थलनिवासिनः॥ तेमे० एवंतर्पणंकृत्वासव्ये
नपिंडान्नमस्कृत्य अस्मत्कुलंवर्धतामितियजमानः स्वस्तिवर्धतामितिब्राह्मणाब्रूयुः॥ युष्मदनुज्ञयापिंडोद्वासनंकरि
ष्ये॥ पिंडाभ्यालक्षयित्वापिंडान्स्थापयेत्॥ यस्यस्मृत्या अनेनत्रिपिंडीश्राद्धांगपिंडदानेनसात्विकराजसतामसप्रेतस्वरू
पीजनार्दनवासुदेवः प्रीयतां॥ सात्विकराजसतामसप्रेतस्योत्तमलोकप्राप्त्यर्थंशालग्रामशिलादानंकरिष्ये॥ शा
लग्रामशिलापुण्याभुक्तिमुक्तिप्रदायिनी॥ शालग्रामप्रदानेनममसंतुमनोरथाः॥१ चक्रांकितसमायुक्ताशालग्रा
मशिलाशुभा॥ दानेनैवभवेत्तस्यउभयोर्वांछितंफलं॥ युष्मदनुज्ञयापात्रासादनंकरिष्ये॥ ओदनेनपाणौप्रत्येकहोमंकृत्वा
पात्राभिघारंकृत्वा मूर्धानंमधुपायसान्नंकृसरान्नादिपरिविष्यहुतशेषंब्राह्मणपात्रेदत्वागायत्र्यास्पृश्य अपसव्यंपृथि
वीतेपात्रमित्यादिदिविभ्यः सात्विकपितृभ्यइत्येतेभ्यइदंमधुपायसान्नंयथोपस्कारसहितंअमुकक्षेत्रेअमुकतीर्थेदत्तम
स्त्वमस्तु॥ एवंराजसतामसयोः॥ येचेहपितरो०॥ सव्यं. ब्रह्मार्पणं. अपसव्यं.॥ एकोविष्णु.॥ ईशानविष्णुः ब्राह्मणाबलिदा
नवर्जंभुंजीयुः॥ तृप्तिप्रश्नांतेउच्छिष्टपिंडदानंविकिरदानंचकृत्वासव्येनमुख्याचमनंअपसव्ये शिवाआपः संतुसुप्रोक्षित
मिस्त्वादि॥ भोजनपात्रंचालयित्वादिव्यंतरिक्षभूमिस्थाः स्वस्तीतिब्रूयात्॥ ततः पश्चात्तमुख्याचार्यंयदनंत्रिपिंडीश्राद्धीयमन्न

मुदकादितदक्षय्यमस्तु॥ एवंराजसतामसयोः॥ भोजनोपविष्टेभ्यो ब्राह्मणेभ्यः श्राद्धसाद्गुण्यार्थं दिविशिष्टेभ्यो विष्णुमयपात्रेभ्य
इदंवस्त्रंदक्षिणा। यातु॥ वासोहिसर्वदैवत्यंसर्वेषामुपकारकं॥ वस्त्रप्रदानात्सततंकुलंमेस्यात्सुसंवृतं॥ अंतरिक्षस्थब्रह्ममये
भ्यः कमंडलुर्दक्षिणाः यातु॥ परापवादपैशुन्यमभक्ष्यस्यचभक्षणात्॥ तत्रोत्थितंचयत्पापंताम्रपात्राद्विनश्यतु॥ तामस
रुद्रमयपात्रेभ्यउपानहौदक्षिणा। यातु॥ उपानहौप्रयच्छामिकंटकादिनिवारणे॥ परित्राणायतेविप्रगृह्णाणत्वंसुखायच॥
स्वधांवाचयिष्ये॥ तद्विष्णोः परमंपदं० ३ अयोध्यामथुरामा० पिंडस्थानेशांति० स्वस्थानेवासः वाजेवाजे० आमावाजस्य०
दातारोनोभिवर्धंतां० ब्राह्मणेराशिर्वादोदय॥ यजमानः॥ अद्यमेसफलंजन्म० देशकालपाकपात्रकर्तृभक्तिविहीनंमन्त्र
याकृतंसात्विकराजसतामसोद्देशेनामुकतीर्थेत्रिपिंडीश्राद्धेनसर्वंब्राह्मणवचनात् श्रीविष्णोः प्रसादात्सर्वंपरिपूर्णमस्तु॥
प्रार्थना दिव्यंतरिक्षभूमिष्ठासात्विकाराजसास्तथा॥ प्रेतावैतामसायेन्येशांतिंयच्छंतुतर्पिताः॥ अस्यस्मृत्वा० अत्रश्रोत्रागत
वर्णंनास्ति॥ सहिरण्यंतिलपात्रंब्राह्मणायप्रदद्यात्॥ तिलाः कृष्णाः पवित्राश्चतिलाः पापहराः स्मृताः॥ शुक्लावायदिवाकृष्णाऋषि
गोत्रसमुद्भवाः॥ यानिकानिचपापानिब्रह्महत्यासमानिच॥ तिलपात्रप्रदानेनतानिनश्यंतुमेसदा॥ महर्षिगोत्रसंभूताः कश्यपस्य
तिलाः स्मृताः॥ तस्मादेषांप्रदानेनममपापंव्यपोहतु॥ ततः सचैलस्नानंअभिषेकः भूयसीदक्षिणा॥ इतिदाल्भ्यस्मृत्युक्तत्रि
पिंडश्राद्धप्रयोगः सामग्री

यवपिष्ट
तंडुलपि
तिलपि.
सर्वसंभार
पंचामृत
यवतंडुल
तिल
श्वेतरक्त
कृष्णपुष्प
तुलसी
धूपदीप
मधुदुग्धं
तर्पणार्थं
सूत्रं
ताम्रभाजनं
दक्षिणा
वस्त्र
कमंडलु
उपानहौ
सहिरण्य
तिलपात्रं
शालग्रा
म:
कुशताम्र
पात्रंअ
र्घ्यार्थं
विष्णुत
र्पणार्थं
शंख: